Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# अथाशौचनिर्णयः त्र्यंबकीयः

Serving JinShasan
073523
gyanmandir@kobatirth.org

मूल्यं ४ आणकाः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीगणेशाय नमः ॥ ॥ गणाधिपं नमस्कृत्य प्रत्यूहाद्रिपविं
कविम् ॥ त्र्यंबकेणाशुबोधाय क्रियतेऽशौचनिर्णयः ॥ १ ॥ अर्थतः
शब्दतश्चेह पौनरुक्त्यं न दुष्यति ॥ स्फुटबोधाय बालानां ग्रंथोऽयं
रच्यते यतः ॥ २ ॥ अत्र प्रागुपनयनात्कामचारकामवाद्कामभक्षा
इति गौतमोक्तेरनुपनीतस्य पित्रादिसंस्कारं विनाऽशौचे नाधिकारः॥
उपनयनोत्तरमपि ब्रह्मचारिणः पित्राद्यंतकर्मकरण एवाशौचाधि-
कारो नान्यत्र ॥ तस्माद्विजानां समावर्तनोत्तरं निरंकुशोऽशौचाधि-
कारः ॥ स्त्रीशूद्रयोस्तु विवाहस्योपनयनस्थानापन्नत्वेन विवाहोत्तर-
मेवाशौचाधिकारः ॥ १ ॥ अथ जननाशौचम् ॥ ॥ गर्भिण्या मास-
चतुष्टयपर्यंतं गर्भनाशः स्राव इत्युच्यते ॥ तदा गर्भिण्या मास- १
त्रयपर्यंतं त्रिरात्रं चतुर्थमासे चतूरात्रमाशौचं अस्पृश्यत्वम् ॥
पित्रादिसपिंडानां स्रावमात्रे स्नानाच्छुद्धिः ॥ २ ॥ गर्भिण्याः पंचम-

For Private and Personal Use Only

षष्ठमासयोर्गर्भनाशः पात इत्युच्यते ॥ तत्र गर्भिण्या माससंख्यया पंच षट् च दिनानि क्रमेणास्पृश्यत्वावहमाशौचम् ॥ पित्रादिसपिंडानां तु त्रिरात्रं जननाशौचम्, मृताशौचं तु नास्ति ॥ इदमेतावत्पर्यंतं सर्ववर्णसाधारणं वयोवस्थानिमित्तत्वात् ॥ ३ ॥ गर्भिण्याः सप्तममासप्रभृति प्रसवे सर्वेषां मातृपित्रादीनां सपिंडानां विप्राणां दशाहम् ॥ क्षत्रियाणां द्वादशाहम् ॥ वैश्यानां पंचदशाहम् ॥ शूद्राणां मासम् ॥ सच्छूद्रस्य मासार्धम्, जननाशौचं मृताशौचं तु नास्ति ॥ सापत्नमातुः सर्वत्र पितृवत् ॥ ४ ॥ जननाशौचे गर्भिण्याः दशाहमस्पृश्यत्वम् ॥ पितुः सापत्नमातुश्च स्नानात्प्रागस्पृश्यत्वम् ॥ स्नानोत्तरं स्पृश्यत्वमेव ॥ किंतु सर्वत्र सपिंडानां कर्मानधिकारमात्रम् ॥ तत्रापि नालच्छेदनात्पूर्वं जातकर्मदानादौ पितुरधिकारः ॥
आ. २ एवं प्रथमषष्ठदशमादिवसेषु जन्मदाख्यदेवतापूजायां च पितुर्वच-

 नादधिकारः ॥ कूटस्थमारभ्य सप्तपुरुषपर्यंतं सपिंडाः ॥ ततः सप्त 
सोदकाः ॥ ततः सप्त सगोत्राः ॥ सोदकानां तु त्रिरात्रमाशौचम् ॥
सगोत्राणां स्नानमात्रम् ॥ ५ ॥ गर्भिण्याः दशाहोत्तरं पुत्रोत्पत्तौ
विंशतिदिनानि, कन्योत्पत्तौ मासपर्यंतं कर्मानधिकारः ॥ ६ ॥ इति
जननाशौचम् ॥ ॥ अथ मृताशौचम् ॥ ॥ तत्र तद्गतामस्पृश्यत्वं
कर्मानधिकारश्चेत्युभयं भवति ॥ मृतजाते शिशौ सर्वेषां सपिंडानां
दशाहं जननाशौचं मृताशौचं तु नास्ति ॥ ७ ॥ नालच्छेदनात्पूर्वं
शिशौ मृते मातुर्दशाहम् ॥ पित्रादिसपिंडानां त्रिरात्रं जननाशौचं
मृताशौचं तु नास्ति ॥८॥ नालच्छेदादूर्ध्वं शिशुमरणे दशाहं जनना-
शौचं सर्वेषां सपिंडानामस्ति ॥ मृताशौचं तु नास्ति ॥ ९ ॥ 
दशाहानंतरं नामकरणात्प्राक् शिशुमरणे स्नानमात्रेण सपिंडानां
शुद्धिः ॥ मातापित्रोस्त्रिरात्रं पुत्रमृतौ ॥ कन्यामृतौ तु एकाहः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाम्नः पूर्वं खननमेव नित्यं नोदकदानादि ॥ अलंकरणं तु सर्वत्र भवति ॥ १० ॥ नामकरणोत्तरं वर्षपर्यंतं दाहखननयोर्विकल्पः ॥११॥ नामोत्तरं दंतोत्पत्तेः प्राक् पुत्रमरणे दाहे सपिंडानामेकाहः ॥ खनने तु स्नानाच्छुद्धिः ॥ मातापित्रोरुभयत्रापि त्रिरात्रम् ॥ कन्यामृतौ तु त्रिपुरुषसापिंडानां उभयत्रापि स्नानाच्छुद्धिः ॥ मातापित्रोरुभयत्रापि एकाहः ॥ १२ ॥ दंतोत्पत्तेरूर्ध्वं वर्षत्रयपर्यंतं पुत्रमरणे दाहे खनने वा सपिंडानामेकाहः ॥ मातापित्रोस्त्रिरात्रम् ॥ कन्यामृतौ तु त्रिपुरुषसापिंडानां उभयत्रापि स्नानाच्छुद्धिः ॥ मातापित्रोस्त्रिदिनमाशौचम् ॥ १३ ॥ प्रथमवर्षादौ कृतचूडस्य पुत्रस्य मरणे पित्रादिसापिंडानां त्रिदिनमाशौचं नियतम् ॥ दाहश्च नियतः ॥ १४ ॥ त्रिवर्षोर्ध्वं कृतचूडस्याकृतचूडस्य वा पुत्रस्य मरणे प्रागुपनयनात्पित्रादिसपिंडानां त्रिदिनमाशौचम् ॥ दाहश्च नियतः ॥

For Private and Personal Use Only

उदकदानादि तूष्णीम् ॥ कृतचूडस्य भूमौ पिंडदानं तूष्णीम् ॥ १५ ॥ कन्यायाः वर्षत्रयानंतरं वाग्दानात्प्राङ्मरणे त्रिपुरुषसपिंडानामेकाहः ॥ मातापित्रोस्त्रिदिनम् ॥ दाहोदकदानादि तूष्णीमेव ॥ १६ ॥ वाग्दानोत्तरं विवाहात्प्राङ्मृतासु कन्यासु भर्तृकुले पितृकुले च सप्तपुरुषसपिंडानां पित्रादीनां सर्वेषां त्रिदिनमाशौचम् ॥ दाहोदकदानादि तूष्णीम् ॥ १७ ॥ उपनयनोत्तरं मृतस्य पुरुषस्य सर्वेषां सपिंडादीनां विप्राणां दशाहम् ॥ क्षत्रियाणां द्वादशाहम् ॥ वैश्यानां पंचदशाहम् ॥ शूद्राणां मासम् ॥ सच्छूद्राणां मासार्धम् ॥ सोदकानां त्रिरात्रम् ॥ गोत्रजानां स्नानाच्छुद्धिः ॥ १८ ॥ विवाहोर्ध्वं कन्यायाः पितृगृहे मरणे मातापित्रोः सोदरभ्रातुश्च त्रिरात्रम् ॥ पितृव्यादीनामेकाहः ॥ १९ ॥ ऊढायाः कन्यायाः पितृगृहे प्रसवे मातापित्रोस्त्रिरात्रम् ॥ सोदरस्यैकरात्रम् ॥ पितृव्यादीनामेकाह इति

केचित् ॥ २० ॥ पतिगृहे प्रसवे पित्रादीनामाशौचं नास्ति ॥ २१ ॥ ऊढायाः कन्यायाः पतिगृहे मरणे मातापित्रोस्त्रिरात्रम् ॥ २२ ॥ मातापित्रोर्मरणे ऊढपुत्र्यास्त्रिरात्रं दशाहांतम् ॥ दशाहोर्ध्वं कालांतरे वत्सरांतेऽपि पक्षिणी ॥ अत्रैव अतिक्रांताशौचं ब्राह्मणवचनाद्भवति नान्यत्र ॥ २३ ॥ भ्रातृभगिन्योः परस्परगृहमरणे परस्परस्य त्रिरात्रम् ॥ गृहांतरमृतौ तु परस्परस्य पक्षिणी ॥ २४ ॥ मातुलमरणे भगिन्यपत्यस्य पक्षिणी ॥ उपकारिमातुलमरणे तु त्रिरात्रम् ॥ २५ ॥ मातुलान्या मरणे भर्तृभगिन्यपत्यस्य पक्षिणी ॥ २६ ॥ उपनीतभागिनेयमरणे मातुलस्य मातुलभगिन्याश्च त्रिरात्रम् ॥ अनुपनीते मृते तु मातुलस्य मातुलभगिन्याश्च पक्षिणी ॥ २७ ॥ मातामहमरणे दुहित्रपत्यस्य त्रिरात्रम् ॥२८॥ अनुपनीतदौहित्रमरणे मातामहस्य मातामह्याश्च पक्षिणी ॥ उपनीते मृते तु त्रिरात्रमिति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



केचित् ॥ २९ ॥ मातामह्यां मृतायां दुहित्रपत्यस्य पक्षिणी ॥ ३० ॥ श्वश्रूश्वशुरयोर्मृतौ सत्यां जामातुः सन्निधौ त्रिरात्रमसन्निधौ पक्षिणी ॥ ग्रामांतरे चैकरात्रम् ॥३१॥ जामातरि मृते तु श्वश्रूश्वशुरयोः स्नानाच्छुद्धिः ॥ एकाहमाशौचमिति केचित् ॥३२॥ श्यालके मृते भगिनीभर्तुरेकाहः । श्यालकसुतमरणे तु स्नानमात्रम् ॥ ३३ ॥ पितृष्वसरि मृतायां भ्रात्रपत्यस्य पक्षिणी ॥ ३४ ॥ मातृष्वसरि मृतायां स्वस्त्रपत्यस्य पक्षिणी ॥३५॥ आत्मनः पितृष्वसृमातृष्वसृमातुलपुत्रा आत्मबांधवाः ॥ पितुः पितृष्वसृमातृष्वसृमातुलपुत्राः पितृबांधवाः ॥ मातुः मातृष्वसृपितृष्वसृमातुलपुत्रा मातृबांधवाः ॥ एते त्रिविधा बांधवाः ॥ बंधुत्रये एतेषु मृतेषु पक्षिणी ॥ पितृष्वस्रादिकन्यानामूढानां मरणे एकाहः ॥ दत्तकमृतौ तु पूर्वापरपित्रोस्त्रिरात्रम् ॥ सपिंडानामेकाहः ॥ ३६ ॥ पूर्वापरपित्रोर्मृतौ दत्तकस्य



For Private and Personal Use Only

त्रिरात्रम् ॥ ३७ ॥ दत्तकस्य पुत्रपौत्राणां मरणे जनने वा सपिंडानामेकाहः ॥ ३८ ॥ सपिंडे पुत्रीकृते दत्तके मृते तु सपिंडानां दशाह एव ॥ ३९ ॥ आचार्यमरणे शिष्यस्य त्रिरात्रम् ॥ तत्पुत्रपत्न्योर्मरणे एकाहः ॥ उपनीयाध्यापक आचार्य इत्युच्यते ॥ वेदैकदेशाध्यापक उपाध्यायः ॥ तन्मरणे शिष्यस्यैकरात्रम् ॥ ४० ॥ शिष्यस्योपनीतस्य मरणे गुरोस्त्रिरात्रम् ॥ परोपनीतस्य मरणे तु एकरात्रम् ॥ ४१ ॥ सहाध्यायिनो मृतौ एकग्रामीणयोरनूचानश्रोत्रिययोर्मृतौ चैकाहः ॥ सांगवेदाध्यायी अनूचानः ॥ वेदमात्राध्यायी श्रोत्रियः ॥ अध्ययनशब्दार्थस्यार्थज्ञानपर्यवसायित्वं न्यायसिद्धम् ॥ ४२ ॥ असपिंडस्यापि श्रोत्रियस्य मैत्रादिसंबन्धस्य यद्गृहे मरणं तद्गृहस्वामिन एकरात्रम् ॥ ४३ ॥ वानप्रस्थे यतौ षंढे च मृते युद्धे च मृते सपिंडानां स्नानमात्रम् ॥ ४४ ॥ ॥ अथातिक्रांताशौचम् ॥ तत्र जननेऽतिक्रांताशौचं

नास्ति ॥ पितुः स्नानं तत्रापि भवति ॥ मृतके तु अनुपनीतमरणादि-निमित्तकत्रिरात्रादिषु भगिनीमातुलादिमरणनिमित्तकत्रिरात्रादिषु चातिक्रांताशौचं नास्ति ॥ किंतु दशाहादिमृताशौचविषयमेव ॥४५॥ दशाहमध्ये जनने मरणे ज्ञाते पुत्रादीनां च सर्वेषां शेषेणैव शुद्धिः ॥ संस्कारमपि शेषेणैव समापयेत् ॥ अस्थिपर्णशरसंस्कारमपि शेषेणैव समापयेत् ॥४६॥ आद्यत्रिरात्रमध्ये समानोदकमरणे ज्ञाते समानोदकानां शेषेणैव शुद्धिः ॥ त्रिरात्रेऽतिक्रांते तु दशाहमध्ये ज्ञातेऽपि नाशौचं किंतु स्नानमात्रम् ॥ अयमेव न्यायो मातुलादित्रिरात्रादिषु ज्ञेयः ॥४७॥ मातापित्रोर्मरणे दूरदेशेऽपि संवत्सरांतरपि श्रवणे पुत्रो दशाहादिपूर्णमेवाशौचं कुर्यात् ॥ ४८ ॥ स्त्रीपुंसयोः परस्परमरणे परस्परं देशांतरे वत्सरांतेऽपि पूर्णं दशाहादि भवति ॥४९॥ सपत्नीषु परस्परमृतौ परस्परस्य देशकालावनपेक्ष्य दशाहं पूर्णमेवाशौचं भवति

॥ ५० ॥ सापत्नमातुर्मरणे संवत्सरोर्ध्वमपि देशान्तरेऽपि त्रिरात्रम् ॥५१॥ औरसपुत्रे मृते संवत्सरोर्ध्वमपि मातापित्रोस्त्रिरात्रम् ॥ ५२ ॥ दशाहोर्ध्वमेकदेशे ज्ञातिमरणे ज्ञाते मासत्रयपर्यंतं त्रिरात्रम् ॥ षण्मासपर्यंतं पक्षिणी ॥ नवमासपर्यंतं एकदिनं तदनन्तरं स्नानमात्रमिति वृद्धवसिष्ठः ॥ पक्षत्रयपर्यंतं त्रिरात्रम् ॥ षण्मासपर्यंतं पक्षिणी ॥ वर्षपर्यंतमेकरात्रम् ॥ तदूर्ध्वं स्नानमात्रमिति माधवे देवलः ॥ अत्रापदनापद्विषयत्वेन व्यवस्था द्रष्टव्या ॥ ५३ ॥ दशाहोर्ध्वं देशांतरे ज्ञातिमरणे ज्ञाते त्रिपक्षपर्यंतं त्रिरात्रम् ॥ ततो मासषट्कपर्यंतं अहोरात्रम् ॥ ततो वर्षपर्यंतं दिवा श्रवणे आसायं रात्रिश्रवणे आप्रातराशौचम् ॥ वत्सरांते तु स्नानाच्छुद्धिः ॥ इदं सर्वमतिक्रांताशौचं सर्ववर्णसाधारणम् ॥ अत्र देशांतरे ज्ञातिमृते ज्ञाते स्नानाच्छुद्धिरिति केचित् ॥ तन्माधवोदाहृतविष्णुस्मृत्यज्ञानविलसितमिति ज्ञेयम् ॥ देशांतरं तु

For Private and Personal Use Only

 विप्रस्य विंशतियोजनांतरं क्षत्रियस्य चतुर्विंशतियोजनांतरं वैश्यस्य 
सच्छूद्रस्य च त्रिंशद्योजनांतरमसच्छूद्रस्य षष्टियोजनांतरं ज्ञेयम् ॥
पक्षांतराणि तु उक्तपक्षानुसारेण ज्ञातव्यानि ॥ ५४ ॥ अत्रायं
निष्कर्षः—यानि एकगोत्रविषयकजननमरणातिक्रांताशौचानि तानि
जायापतिभ्यामुभाभ्यामविशेषेणानुष्ठेयानि ॥ यानि पुनर्भगिनीमा-
तुलादिभिन्नगोत्राशौचानि तेषु जायापतिमध्ये यत्संबंधं यत्तत्तेनै-
वानुष्ठेयं नोभाभ्यामिति ॥ ५५ ॥ आहिताग्नेर्मंत्रवद्दाहदिनमारभ्य
पुत्रादिभिराशौचं कार्यम् ॥ ५६ ॥ आहिताग्नौ प्रोषिते मृते मंत्रवद्दा-
हात्पूर्वं पुत्रादीनां नाशौचं संध्यादिकर्मलोपश्च नास्ति ॥५७॥ अना-
हिताग्नेस्तु मरणदिनमारभ्य पुत्रादिभिराशौचं कार्यम् ॥५८॥ अथ 
रात्रौ जनने मरणे वा रात्रिं त्रिभागां कृत्वाऽऽद्यभागद्वये चेत्पूर्वदिनं
तृतीयभागे चेदुत्तरदिनमारभ्याशौचं कार्यम् ॥ अर्धरात्रात्प्राक् पूर्व-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिनं परत उत्तरदिनम् ॥ प्राक्सूर्योदयात्पूर्वं दिनम् ॥ ऊर्ध्वमुत्तरमिति ॥ पक्षत्रयं देशांतरतो व्यवस्थितम् ॥ महाराष्ट्रदेशे तु आद्यपक्ष एव चरति ॥५९॥ इति त्र्यंबकीये आशौचनिर्णयः ॥ अथाशौचसंपाते निर्णयः ॥ तत्र दशाहमृतके दशाहं ततो न्यूनं वा मृतकमुपस्थितं भवति तदा पूर्वशेषेण शुद्धिः ॥ ६० ॥ दशाहे सूतके दशाहं ततो न्यूनं वा सूतकं पतति तदा पूर्वशेषेण शुद्धिः ॥ ६१ ॥ सूतकमध्ये दशाहं न्यूनं वा मृतकं पतति तदा तस्य न पूर्वेण शुद्धिः ॥ तत्र सूतकस्यावशिष्टत्वे तु मृतकसमाप्त्या सूतकमपि समापनीयम् ॥ ६२ ॥ त्र्यहादिरूपे मृतके सूतके च दशाहमृतकपाते च दशाहसूतकपाते च न पूर्वेण शुद्धिः ॥ ६३ ॥ मृतके सूतकस्य समन्यूनस्य वा संपाते पूर्वेण शुद्धिः ॥ ६४ ॥ अधिकस्यापि सूतकस्य शुद्धिरिति शुद्धिविवेककारः ॥ ६५ ॥ पूर्वाशौचमध्ये उत्पन्नमपि पूर्वाशौचोत्तरं ज्ञातं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चेदुत्तरमेव कार्यम् ॥ दशाहांत्यरात्रौ यदि दशाहं सूतकं पतति तदा दिनद्वयमधिकं कार्यम्, सा रात्रिः परेद्युश्च ॥ ६६ ॥ दशाहांत्यरात्रिचतुर्थयामे यदि दशाहमाशौचं पतेत्तदा दिनत्रयमधिकं कार्यम् ॥ ६७ ॥ त्र्यहाद्याशौचानां परस्परं रात्रिशेषे संपाते पूर्वेणैव शुद्धिः न द्व्यहादिवृद्धिः ॥ ६८ ॥ वर्धिते द्वित्रिदिनमध्ये आशौचांतरसंपाते च अधिकस्य न पूर्वेण शुद्धिः ॥ समन्यूनयोस्तु पूर्वेण शुद्धिः ॥ ६९ ॥ सपिंडाशौचेन मातृपितृभर्तॄणामाशौचं नापैति ॥७०॥ मात्राशौचमध्ये पित्राशौचपाते पूर्वशेषेण शुद्धिः ॥ ७१ ॥ पितुः संपूर्णाशौचेन शुद्धिरित्यन्ये ॥ तेषां शेषपदस्य पूर्णपरत्वं लाक्षणिकम् ॥ पित्राशौचमध्ये मातृमरणे तु पित्राशौचं समाप्य पक्षिणीमधिकं कुर्यात् ॥ ७२ ॥ इदं दशमरात्रेरर्वाग्भवति ॥ दशमरात्र्यां तद्रात्रिचतुर्थयामे मातृमरणे तु द्व्यहं त्र्यहं वेति न पक्षिणी ॥ ७३ ॥



For Private and Personal Use Only

मातुर्भर्त्रा सहान्वारोहणे तु नाधिका पक्षिणी ॥ पूर्वाशौचेन शुद्धिः ॥ ७४ ॥ सूतिकायां अग्निदे प्रेतपुत्रेषु च नास्ति ॥ अत्र प्रेतपुत्रेति पुनर्ग्रहणं वचनांतरानुरोधेन ॥७५॥ सूतके मृतकपाते न पिंडादाने प्रतिबंधः ॥ मृतके सूतकसंपाते जातकर्मादि तदानीमाशौचांते वा कुर्यात् इति विकल्पः ॥ ७६ ॥ मातुर्वाऽधिका पक्षिणी तन्मध्ये पितु-रेकादशाहं श्राद्धं कुर्यात् ॥ ७७ ॥ शवस्पर्शे दिवा चेन्नक्षत्रदर्शना-च्छुद्धिः ॥ रात्रौ चेत्सूर्यदर्शनात् ॥ तदन्नाशने तद्गृहवासे यावत्ते-षामाशौचं तावदाशौचम् ॥७८॥ संसर्गाशौचे कर्माधिकारो नास्ति ॥ किंतु अस्पृश्यत्वमात्रम् ॥७९॥ तद्गृह्याणां तद्द्रव्याणां नाशौचसंबंधः ॥ ८० ॥ स्नेहेन सवर्णानिर्हारे तदन्नाशने तद्गृहवासे च दशाहः ॥ तदन्नानशने तद्गृहवासे त्र्यहः ॥ ८१ ॥ अगृहवासेऽन्नभक्षणे निर्ह-रणमात्रे कृते चैकाहः ॥ ८२ ॥ भृतिग्रहणे सवर्णनिर्हारे दशाहे च

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 तज्जात्याशौचं दशाहादि ॥ ८३ ॥ विजातीयनिर्हारे विजातीयदाहे च 
शवजातीयमाशौचम् ॥ भृतिग्रहणे विजातीयनिर्हारे दाहे च शव-
जातीयाद्द्विगुणम् ॥ ८४ ॥ सोदकनिर्हारे दशाहः ॥ ८५ ॥ असपिं-
डालंकरणे अज्ञानादुपवासः ॥ अशक्तौ स्नानम् ॥ ज्ञानतः पादकृ-
च्छ्रम् ॥८६॥ धर्मार्थमनाथशवसवर्णनिर्हरणे क्रियाकरणेऽग्निदाने च
द्विजस्य अनंतफलम् ॥ स्नानाच्छुद्धिः प्राणायामोऽग्निस्पर्शश्च ॥८७॥
धर्मार्थमनाथसवर्णनिर्हरणादावपि मातुलादिसंबंधे सति त्रिरात्र-
माशौचम् ॥८८॥ अनुगमने तु सपिंडे न दोषः, असपिंडेऽपि अनाथ-
क्रियायां न दोषः ॥८९॥ समोत्कृष्टवर्णीयशवानुगमने स्नात्वा हुताशं
स्पृष्ट्वा सर्पिः प्राश्य पुनः स्नात्वा प्राणायामं कुर्यात् ॥९०॥ हीनवर्ण- 
शवानुगमने क्षत्रिये एकाहः ॥ वैश्ये पक्षिणी ॥ शूद्रे त्रिरात्रम् ॥
पूर्ववत्स्नानादि च ॥ ९१ ॥ ब्रह्मचारिणः सपिंडमरणे नाशौचम् ॥

For Private and Personal Use Only

नान्यस्य निर्हारदाहाद्यौर्ध्वदेहिकेऽधिकारः ॥ ९२ ॥ तत्करणे पुनरुपनयनम् ॥ कृच्छ्रप्रायश्चित्तम् ॥ ९३ ॥ ब्रह्मचारिणः पितृमात्राचार्योपाध्यायमातामहानामंत्यकर्मकरणे न दोषः ॥ तत्र दशाहमस्पृश्यत्वलक्षणमाशौचम् ॥ ९४ ॥ दशादिनं संध्याग्निकार्यादिकर्माधिकारोऽस्त्येव ॥ ९५ ॥ एकादिनमस्पृश्यत्वमिति माधवः ॥ ९६ ॥ पित्राद्याशौचेऽपि नाशौचिनामन्नं ब्रह्मचारी भक्षयेत् ॥ भक्षणे तु पुनरुपनयनम् ॥ ९७ ॥ ब्रह्मचारिणः पित्राद्यन्त्यकर्माकरणे तु पित्रादिमरणेऽपि नाशौचम् ॥ ९८ ॥ समावर्तनोत्तरं पूर्वमृतानां त्रिदिनाशौचं कार्यमेव ॥ ९९ ॥ कृतजीवच्छ्राद्धेन किमप्याशौचं न कार्यमिति हेमाद्रिः ॥ १०० ॥ वानप्रस्थयतिपतितयोरपि किमप्याशौचं न कार्यम् ॥ तेषामपीतरैर्न कार्यम् ॥ १ ॥ परेषां सर्ववर्णानामौर्ध्वदेहिककरणे तज्जात्याशौचं कृत्वा कृच्छ्रत्रयाच्छुद्धिः ॥ २ ॥ हीनवर्णौर्ध्वदेहिककरणे तु शवजातीयमा-

शौचं कृत्वा कृच्छ्रत्रयद्वैगुण्याच्चूह्यम् ॥ ३ ॥ आहिताग्नेरस्थिदाहे प्रति-
कृतिदाहे वा सर्वसपिंडानां दशाहाद्याशौचम् ॥ ४ ॥ अनाहिताग्नेस्तु
अस्थिदाहे पर्णशरदाहे च पत्नीपुत्रयोः पूर्वमगृहीताशौचयोर्दशाहिकं
पूर्णमेव ॥ ५ ॥ गृहीताशौचयोस्तु तयोरपि संस्कारकाले त्रिरात्रम् ॥
पत्नीसंस्कारे पत्युश्चैवम् ॥ सपत्न्योर्मिथश्चैवम् ॥ ६ ॥ अन्यसपिंडानां
पूर्वमगृहीताशौचानां अनाहिताग्निसंस्कारकाले त्रिरात्रम् ॥ पूर्वम-
गृहीताशौचानां तु सपिंडानां संस्कारकाले स्नानमात्रम् ॥ ७ ॥ इदं
त्रिरात्रादिकं दशाहोर्ध्वं संस्कारकरणे ज्ञेयम् ॥ दशाहमध्ये तु शेष-
दिवसैरेवाशौचसिद्धेरुक्तत्वात् ॥ ८ ॥ रजस्वलायास्तु विंशतिदिनोत्तरं
प्रायशो रजोदर्शनं भवति, तस्याः सप्तदशादिनपर्यंतं पुना रजोदृष्टौ ९
स्नानमात्रम् ॥ अष्टादशे एकरात्रम् ॥ एकोनविंशे द्विदिनम् ॥
विंशतिप्रभृति दिनत्रयम् ॥ ९ ॥ यस्यास्तु विंशतिदिनादर्वाक्प्रायशो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रजोदर्शनं भवति तस्या दशादिनपर्यंतं स्नानमात्रम् ॥ एकादशे एकरात्रं द्वादशे द्विरात्रं त्रयोदशादारभ्य त्रिरात्रम् ॥ ११० ॥ इति त्र्यंबकीयेऽशौचनिर्णये दशोत्तरशतोंऽशः ॥ अत्र मूलवचनानि मिताक्षरादिनिबंधेभ्यो ज्ञेयानि ॥ तानि विस्तरभिया बालानां दुरधिगमत्वाच्च न लिखितानि ॥

इदं पुस्तकं नारायण राम आचार्य "काव्यतीर्थ" इत्यनेन संशोधितं तच्च मुम्बय्यां सत्यभामाबाई पाण्डुरङ्ग इत्येताभिः 'निर्णयसागरा'ख्यमुद्रणयन्त्रालये मुद्रापयित्वा तस्यैव कृते प्रकाशितम् ।

शके १८६८, सन १९४७.

पब्लिशर—सत्यभामाबाई पांडुरंग,
प्रिंटर—रामचंद्र येसू शेडगे.
निर्णयसागर प्रेस, २६/२८ कोलभाट स्ट्रीट, मुंबई.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्याशौचनिर्णयः त्र्यंबकीयः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only